चित्तविभ्रमा मत्ता या स्यात् स्वाधीनभर्तृका” सा०द० । सा च पञ्चविधा “मुग्धा मध्या प्रौढ़ा स्वकीया सामान्या चेति” रसमञ्जरी ।

**स्वाध्याय** पु० स्वः स्वकीयत्वेन विहित अध्यायः द्विजानाम्, अधि+इङ—कर्मणि घञ् । १द्विजैः पाठ्ये वेदभागभेदे “स्वाध्यायोऽध्येतव्यः” इति श्रुतिः । सु+आ+अधि इङ भावे घञ् । २अवश्यपाठ्यवेदाध्ययने “स्वाध्यायो जप इत्युक्तो वेदाध्ययनकर्मणीति” स्मृतिः ।

**स्वान्त** न० स्वन-क्त । १मनसि अमरः २गह्वरे मेदि० । ३शब्दिते त्रि० । [४स्पर्शानहतायां च मेदि० ।

**स्वाप** पु० स्वप-घञ् । निद्रायाम् अमरः । २शयने ३अज्ञाने

**स्वापतेय** न० स्वपतेरागतः ढञ् । धने अमरः ।

**स्वाभाविक** त्रि० स्वभावादागतः ठञ् । स्वभावसिद्धे स्त्रियां ङीप् ( स्वाभाविकी” स्वच्छन्देत्युद्भटः ) ।

**स्वामिन्** पु० स्व+अस्त्यर्थे मिनि दीर्घः । १भर्त्तरि पत्यौ धरणिः । २कार्त्तिकेये मेदि० । ३राजनि अमरः । ४विभौ ५हरे ६हरौ च शब्दर० । ७वात्स्यायनमुनौ त्रिका० । ८अधिपतौ त्रि० अमरः । ९जैनभेदे पु० हेमच० १०परिव्राजकोपाधिभेदे पु० । तस्य भावः त्व स्वामित्व स्वत्वनिरूपिते क्रयाद्यधीने व्याप्यवृत्तौ पदार्थभेदे स्वत्वशब्दे दृश्यम् ।

**स्वामिपालविवाद** पु० स्वामी च पालौ च तयोर्विवादः विवादभेदे तत्स्वरूपादिकं वीरमि०उक्तं यथा “अथ स्वामिपालविवादाख्यव्यवहारपदम् । तत्र मनुस्तदभिधानप्रतिज्ञां करोति । “पशुषु स्वामिनां चैव पालानाञ्च व्यतिक्रमे । विवादं संप्रवक्ष्यामि यथावद्धर्मतत्त्वतः” इति । स्वामिपालयोः प्रतिदिनकृत्यमाह नारदः “उपानयेद्गा गोपाय प्रत्यहं रजनीक्षये । चीर्णाः पीताश्च ता गोपः सायाह्ने प्रत्युपानयेत्” इति । चीर्णाः तृणादिकं भक्षितवतीः । पीताः पीतवतीः । स्वामिना प्रातर्याबत्यः समर्पितास्तावत्यो गोपालेन सायं प्रत्यर्पणीया इत्यर्थः । गोग्रहणं पशुमात्रोपलक्षणार्थम् । तथा च याज्ञवल्क्यः “यथार्पितान् पशून् गोपः सायं प्रत्यर्पयेत् तथा” इति । गवादिपरिपालकस्य भृति परिमाणमाह नारदः “गवां शताद्वत्सतरी धेनुः स्याद् द्विशताद् भृतिः । प्रतिसंवत्सरं गोपे सन्दोहश्चाष्टमेऽहनि” इति । प्रतिसंवत्सरं संवत्सरे संवत्सरे गोशतपरिपालने वत्सतरी द्विहायनी गौर्भृतिः । द्विशतपरिपालने धेनुर्दोग्ध्री सवत्सेति यावत् । अष्टमे दिवसे सन्दोहः सर्वासां गवान्दोहश्च भृतित्वेन कल्पनीय इत्यर्थः । वृहस्पतिरपि “तथा धेनुभृतः क्षीरं लभेताप्यष्टमेऽहनि” इति । धेनुभृतः धेन्वाभृतः द्विशतपालक इत्यर्थः । तथा च सन्दोहो धेन्वा समुन्नीयते न वत्सतर्य्येति मदनरत्ने । कल्पतरौ तु धेनुभृतो गोपाल इति व्याख्यातत्वेन वत्सतर्य्यापि समुन्नीयत इति गम्यते । गोग्रहणं महिष्यादीनामुपलक्षणम् । न्यूनाधिकपरिपालने तु तदनुसारेण भृतिकल्पना द्रष्टव्या । इयञ्च वत्सतर्य्यादिभृतिकल्पना परिभाषितभृत्यभावविषया । परिभाषिते तु परिभाषानतिक्रमेणैव देया । मनुस्तु प्रकारान्तरेण भृतिपरिमाणमाह “गोपः क्षीरभृतो यस्तु स दुह्याद्दशतो वराम् । गोस्वाम्यनुमतो भृत्यः सा स्यात् पालेऽभृते भृतिः” इति । दशानान्दोग्ध्रीणां मध्ये वरामुत्कृष्टां स्वीकृत्य तत्क्षीरभृतो भृत्यो गोपः दशदोग्ध्रीपालनकृद् गृह्णीयाद् भृत्यर्थम् । सैषा भृतिः पूर्वं द्रव्यान्तरेणाभृते ज्ञेया । यस्तु द्रव्यान्तरेण भृतः तत्र तदेव भृतिरित्यर्थः । यस्तु भृतिं गृहीत्वा पशून्मारयेत् विनाशयति वा तं प्रत्याह याज्ञवल्क्यः “प्रमादमृतनष्टांश्च प्रदाप्यः कृतवेतनः” इति । प्रमादग्रहणं पशुपालकदोषोपलक्षणार्थम् मनुना प्रमादनाशः स्पष्टीकृतः “नष्टं विनष्टं कृमिभिः श्वहतं विषमे मृतम् । हीनं पुरुषकारेण प्रदद्यात् पाल एव तु” इति । श्वहतम् शुना हतम् । विषमे दुर्गमप्रदेशे । पुरुषकारः पुरुषप्रयत्नः । यत् पुरुषप्रयत्नेन हीनं सञ्जाशादिकं प्राप्तं तद्दातव्यमित्यर्थः । पुरुषकारश्च वृहस्पतिना दर्शितः “कृमिचोरव्याघ्रभयाद्दरीश्वभ्राच्च पालयेत् । व्यायच्छेच्छक्तितः क्रोशे स्वामिने वा निवेदयेत्” इति । व्यायच्छेत् व्यसनाभावाय यतेतेत्यर्थः । चौरैर्बलात्कारेणापहृते न दाप्य इत्याह मनुः “विघुष्य तु हृतञ्चौरैर्न पालो दातुमर्हति । यदि देशे च काले च स्वामिनः स्वस्य शंसति” इति । विघुष्य भृङ्गकादिभिर्घोषं कृत्वा । देशे स्वाम्यवस्थानदेशे । काले अपहरणकालाव्यवहितकाले । विषयविशेषे पशुपालस्य दण्डमाह व्यासः “गृहीतमूल्यो गोपालस्तांस्त्यक्त्वा निर्जने वने । ग्रामचारी क्षपैर्बाध्यः शलाकी च वनेचरः” इति । शलाकी नापित इति कल्पतरौ । पुरुषेण प्रयत्नाकरणे दण्डमाह नारदः “स्वाञ्चेद्गोव्यसनं गोपो व्यायच्छेत् तत्र शक्तितः । अशक्तस्तूर्णमागम्य स्वामिने च निवेदयेत्” । अव्यायच्छन्नविक्रोशन् स्वामिने चा-